# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ३** | गुणा: - ७० |
|---|---|---|
| विषयः - स्वामिनारायणवेदान्तः - J | (C.C.- 4.1.2. New ) | |
| दिनाङ्कः - १७/१२/२०१८ | ऐतरेय-तैत्तिरीयोपनिषदौ । | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) संसारिणः जीवस्य जन्मत्रैविध्यमुपपादयत ।*

*(२) ऐतरेयोपनिषदः प्रथमखण्डस्य सारं लिखत ।*

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) परमपुरुषः परमात्मा देवेभ्यः भोगाश्रयार्थं किं दत्तवान् ? यथाग्रन्थं लिखत ।*

*(२) परमपुरुषः परमात्मा कान् कान् लोकान् असृजत ? यथाभाष्यं लिखत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) शिक्षाध्यायं निरूपयत ।*

*(२) पञ्चाधिकरणकसंहितोपासनस्य किं फलम् ?*

**अथवा**

*महासंहितोपासनायाः फलं स्पष्टयत ।*

**प्रश्नः ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) संहितागतानां चतुर्णामवयवानां लोकादिषु पञ्चस्वधिकरणेषु दृष्टिक्रमं प्रदर्शयत ।*

*(२) स य एषोऽन्तर्हृदयः आकाशः - इति शिष्यं प्रति उपासनोपदेशमुपवर्णयत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) सोऽकामयत..........सच्च त्यच्चाभवदिति मन्त्रं गोपालानन्दमुनिभाष्यानुगुणं व्याख्यात ।*

*(२) यथाग्रन्थमानन्दमयकोशं स्पष्टयत ।*

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) आनन्दवल्ल्यनुसारं पञ्चकोशान् निरूपयत ।*

*(२) यथाग्रन्थं सृष्ट्युत्पत्तिक्रममुपवर्णयत ।*

## चतुर्थान्विति:

**प्रश्नः ७ निम्नलिखितेषु एक एव समाधेयः ।** **( ५ )**

*(१) ॐ सह नाववतु.... मा विद्विषावहै । इति शान्तिमन्त्रं व्याख्यात ।*

*(२) अन्नं ब्रह्मेति व्यजानात् – यथाग्रन्थं स्पष्टयत ।*

**प्रश्नः ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत ।** **( १० )**

*(१) यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्तीति मन्त्रं यथाभाष्यं प्रतिपादयत ।*

*(२) ब्रह्मविद्याङ्गतया अनुष्ठेयानि व्रतानि भृगुवल्ल्यनुसारं लिखत ।*

**प्रश्नः ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः ।** **( १० )**

*(१) का नाम शिक्षा ?*

*(२) कस्मात् वाचः निवर्तन्ते ?*

*(३) रसो वै सः । इति कस्यां वल्ल्यां समन्वितं वाक्यम् ?*

*(४) आनन्दवल्ल्याः अपरं नाम किम् ?*

*(५) केनेमानि भूतानि जायन्ते ?*

*(६) अन्नादः कः ?*

*(७) पञ्चकोशाः के ?*

*(८) वरुणपुत्रः कः ?*

*(९) भृगोः का जिज्ञासा ?*

*(१०) महासंहितोपासने कति अधिकरणानि ?*

*(११) प्रज्ञानस्य नामधेयानि कानि ?*

*(१२) मरः – इति पदस्य कोऽर्थः ?*

*(१३) ऐतरेयोपनिषद् – इति नामकरणे किं तात्पर्यम् ?*

*(१४) सः परमात्मा अशनायापिपासाभ्यां किं प्रजानीहि ?*

*(१५) तैत्तिरीयोपनिषदि कति वल्ल्यः ?*

*--००--*